# śrī mahāgaṇeśapañcaratnastotram

मुदाकरात्त मोदकं सदा विमुक्ति साधकम् । कळाधरावतंसकं विलासिलोक रक्षकम् ।
अनायकैक नायकं विनाशितेभ दैत्यकम् । नताशुभाशु नाशकं नमामि तं विनायकम् ॥ १
mudākarātta mōdakaṃ sadā vimukti sādhakam । kaḻādharāvataṃsakaṃ vilāsilōka rakṣakam ।
anāyakaika nāyakaṃ vināśitēbha daityakam । natāśubhāśu nāśakaṃ namāmi taṃ vināyakam ॥ 1

---

नतेतराति भीकरं नवोदितार्क भास्वरम् । नमत्सुरारि निर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरम् । महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २
natētarāti bhīkaraṃ navōditārka bhāsvaram । namatsurāri nirjaraṃ natādhikāpaduddharam ।
surēśvaraṃ nidhīśvaraṃ gajēśvaraṃ gaṇēśvaram । mahēśvaraṃ tamāśrayē parātparaṃ nirantaram ॥ 2

---

समस्त लोक शङ्करं निरस्त दैत्य कुञ्जरम् । दरेतरोदरं वरं वरेभ वक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करम् । मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३
samasta lōka śaṅkaraṃ nirasta daitya kuñjaram । darētarōdaraṃ varaṃ varēbha vaktramakṣaram ।
kṛpākaraṃ kṣamākaraṃ mudākaraṃ yaśaskaram । manaskaraṃ namaskṛtāṃ namaskarōmi bhāsvaram ॥ 3

अकिञ्छनार्ति मार्जनं छिरन्तनोक्ति भाजनम् । पुरारि पूर्व नन्दनं सुरारि गर्व छर्वणम् ।
प्रपञ्छ नाश भीषणं धनञ्जयादि भूषणम् । कपोल दानवारणं भजे पुराण वारणम् ॥ ४
akiñchanārti mārjanaṃ chirantanōkti bhājanam । purāri pūrva nandanaṃ surāri garva charvaṇam ।
prapañcha nāśa bhīṣaṇaṃ dhanañjayādi bhūṣaṇam । kapōla dānavāraṇaṃ bhajē purāṇa vāraṇam ॥ 4

नितान्त कान्ति दन्त कान्ति मन्त कान्ति कात्मजम् । अछिन्त्य रूपमन्त हीन मन्तराय कृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनाम् । तमेकदन्तमेव तं विछिन्तयामि सन्ततम् ॥ ५
nitānta kānti danta kānti manta kānti kātmajam । achintya rūpamanta hīna mantarāya kṛntanam ।
hṛdantarē nirantaraṃ vasantamēva yōgināṃ । tamēkadantamēva taṃ vichintayāmi santatam ॥ 5

---

महागणेश पञ्छरत्नमादरेण योऽन्वहम् । प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रताम् । समाहितायु रष्टभूति मभ्युपैति सोऽछिरात् ॥ ६
mahāgaṇēśa pañcharatnamādarēṇa yō'nvaham । prajalpati prabhātakē hṛdi smaran gaṇēśvaram ।
arōgatāmadōṣatāṃ susāhitīṃ suputratām । samāhitāyu raṣṭabhūti mabhyupaiti sō'chirāt ॥ 6

---

इति श्री महागणेशपञ्चरत्नस्तोत्रं समाप्तम् ॥

iti śrī mahāgaṇeśapañcaratnastotraṃ samāptam ॥